# प्रश्नोत्तर बैंक

कक्षा- उत्तरमध्यमा द्वितीय वर्षम्
विषयः- नव्य व्याकरणम्
विषय कोड - 1203

## वस्तुनिष्ठप्रश्नाः -

(1) 'श्रौत्रार्हन्तीचणैः' इति पदस्य विग्रहं लिखत ?
उत्तरम् → श्रोत्रं च आर्हन्ती च श्रौत्रार्हन्त्यौ ताभ्यां वित्ताः श्रौतार्हन्तीचणाः तैः श्रौत्रार्हन्तीचणैः इति श्रौत्रार्हन्तीचणैः पदस्य विग्रहः।

(2) कति लकाराः सन्ति तेषां नामानि लिखत ?
उत्तरम् → दश लकाराः सन्ति तेषां नामानि अधोलिखितानि सन्ति - लट्, लिट्, लुट्, लृट्, लेट्, लोट्, लङ्, लिङ्, लुङ्, लृङ् च।

(3) कः लकारः छन्दोमात्रगोचरः।
उत्तरम् → 'लेट्' लकारः छन्दोमात्रगोचरः।

(4) 'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रेण किं विधीयते ?
उत्तरम् → लकाराः सकर्मकेभ्यः कर्मणि कर्तरि च स्युः अकर्मकेभ्यः भावे कर्तरि च स्युः इति।

(5) 'लस्य' इति सूत्रं विधिसूत्रम् अधिकारसूत्रं वा ?
उत्तरम् लस्य इति अधिकारसूत्रम्।

(6) 'तिप्तस्झिसिप्थस्थ०' इत्यादि सूत्रेण कति लादेशाः विधीयन्ते ?
उत्तरम् → 'तिप्तस्झिसिप्थस्थ०' इत्यादि सूत्रेण 'अष्टादश लादेशाः' विधीयन्ते।

(7) लादेशानां परस्मैपद संज्ञा केन सूत्रेण भवति ?
उत्तरम् लादेशानां परस्मैपद संज्ञा 'लः परस्मैपदम्' इति सूत्रेण भवति।

(8) 'तङानावात्मनेपदम्' इति सूत्रेण किं विधीयते ?
उत्तरम् → तङ् प्रत्याहारः शानच्कानचौ च आत्मनेपदसंज्ञा विधीयते।

(9) ~~पद~~ आत्मनेपदनिमित्तहीनाद्धातोः कर्तरि परस्मैपद विधायकं सूत्रं किम्

उत्तरम् → शेषात्कर्तरि परस्मैपदम्।

(10) 'भू' धातोरर्थः कः?

उत्तरम् → 'भू' सत्तायाम्।

(11) 'बभूव' इत्यत्र कः लकारः धातुसहितं लिखत?

उत्तरम् → बभूव इत्यत्र लिट् लकारः भू धातोः।

(12) 'शप्' विधायकं सूत्रं लिखत?

उत्तरम् → 'कर्तरि शप्' इति।

(13) 'स्वरितेतोञितस्च धातोरात्मनेपद विधायकं सूत्रं लिखत?

उत्तरम् → 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति सूत्रम्।

(14) 'सार्वधातुक' संज्ञा केन सूत्रेण भवति?

उत्तरम् – ~~सार्व~~ 'तिङ्शित्सार्वधातुकम्' इत्यनेन सूत्रेण सार्वधातुक संज्ञा भवति।

(15) 'सार्वधातुकार्धधातुकयोः' इत्यनेन सूत्रेण किं भवति?

उत्तरम् → सार्वधातुकार्धधातुकयोः परयोरिगन्ताङ्गस्य गुणः स्यात्।

(16) 'झोऽन्तः' इति सूत्रेण किं विधीयते?

उत्तरम् → प्रत्ययावयवस्य झस्यान्तादेशः विधीयते।

(17) 'लिट् लकारः' केन सूत्रेण विधीयते?

उत्तरम् – 'परोक्षे लिट्' इति सूत्रेण 'लिट् लकारः' विधीयते।

(18) लिडादेशस्तिङः आ संज्ञा केन च सूत्रेण भवति?

उत्तरम् → लिडादेशस्तिङः आर्धधातुकसंज्ञा 'लिट् च' इति सूत्रेण भवति।

(19) अभ्यास संज्ञा विधायकं सूत्रं लिखत?

उत्तरम् → 'पूर्वोऽभ्यासः' इति अभ्यास संज्ञा विधायकं सूत्रम्।

(20) 'अभ्यासे चर्च' इति सूत्रेण किं विधीयते?

उत्तरम् → अभ्यासे झलां चरः स्युः जशश्च। झशां जशः। खयां चरः। तत्रापि प्रकृतिजशां प्रकृतिजशः प्रकृति चरां प्रकृति चर इति विवेक आन्तरतम्यात्।

(21) आर्धधातुक संज्ञा विधायकं सूत्रं लिखत?

उत्तरम् → आर्धधातुकं शेषः।

(22) लघुपधस्य अङ्गस्येको गुणः केन सूत्रेण भवति?

उत्तरम् → 'पुगन्तलघूपधस्य च' इति सूत्रेण भवति।

(23) आशिषि तुह्योस्तातङ् केन सूत्रेण भवति?

उत्तरम् → 'तुह्योस्तातङ्ङाशिष्यन्यतरस्याम्' इति सूत्रेण।

(24) 'मेर्निः' इति सूत्रेण किं विधीयते?

उत्तरम् → लोटः मेर्निः स्यात्।

(25) 'भवानि' इति रूपं कस्मिन्लकारे विद्यते?

उत्तरम् → लोट्लकारे उत्तमपुरुषैकवचने रूपम्।

(26) 'भू' धातोः आशिषि प्रथमपुरुषस्य रूपाणि कानि?

उत्तरम् → भूयात्, भूयास्ताम्, भूयासुः इति रूपाणि।

(27) 'लृङ्' लकारः केन सूत्रेण भवति?

उत्तरम् → 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति सूत्रेण लृङ् लकारः भवति।

(28) 'प्रभवाणि' इत्यत्र 'प्र' उपसर्गस्य प्रागेव केन सूत्रेण प्रयोगः?

उत्तरम् 'ते प्राग्धातोः' इति सूत्रनिर्देशेन प्र उपसर्गस्य प्रागेव प्रयोगः कृतः।

(29) 'टुनदि' समृद्धौ इत्यत्र आदि 'टु' इत्यस्य इत्संज्ञा केन सूत्रेण भवति?

उत्तरम् → 'टुनदि' समृद्धौ इत्यत्र आदि टु इत्यस्य इत्संज्ञा 'आदिर्ञिटुडवः' इति सूत्रेण भवति।

(30) 'सनाद्यन्ता धातवः' इति सूत्रेण किं विधीयते?

उत्तरम् → सनादयः कमेर्णिङन्ताः प्रत्यया अन्ते येषां ते धातुसंज्ञाः स्युः।

(31) 'अत्ति' इत्यत्र शप् लुक् केन सूत्रेण भवति?

उत्तरम् → अदिप्रभृतिभ्यः शपः

(32) लिटि अद् धातोः घस्लृ आदेश विधायकं सूत्रं किम्?

उत्तरम् लिटि अद् धातोः घस्लृ आदेश विधायकं सूत्रम् - 'लिट्यन्यतरस्याम्' इति।

(33) 'घ्नन्ति' इत्यत्र धातुं लकारं पुरुषञ्च लिखत।

उत्तरम् 'घ्नन्ति' इत्यत्र हन् धातुः लट्लकारः प्रथमपुरुषः ~~ब~~ बहुवचनञ्चास्ति।

(34) 'जहि' इत्यत्र धातुं लकारं पुरुषं वचनञ्च किम्?

उत्तरम् जहि इत्यत्र हन् धातुः लोट्लकारः मध्यमपुरुषः एकवचनञ्चास्ति।

(35) 'आह' इति रूपं कस्य धातोः ?

उत्तरम् → ब्रूञ् व्यक्तायां वाचि इति धातोः।

(36) 'एति' इत्यत्र धातुं लकारं पुरुषं वचनं च लिखत ?

उत्तरम् → 'एति' इत्यत्र 'इण्' गतौ धातुः लट्लकारः प्रथमपुरुषः एकवचनञ्चास्ति।

(37) 'विद' धातुः कस्मिन्नर्थे कस्मिन्प्रकरणे च विद्यते ?

उत्तरम् → 'विद्' धातुः ज्ञानेऽर्थे अदादिप्रकरणे च विद्यते।

(38) 'हनो वध लिङि' इति सूत्रेण किं विधीयते ?

उत्तरम् – हन् धातोः वधादेशः भवति लिङि परे।

(39) 'शीङ्' धातोः अर्थं विलिख्य तस्य प्रकरणमपि लिखत ?

उत्तरम् → 'शीङ्' धातुः शयने अर्थे अदादिप्रकरणे विद्यते।

(40) 'हु' धातोः अर्थं लिखत ?

उत्तरम् → 'हु दानादनयोः' इति हु धात्वर्थः।

(41) 'शपः' श्लुः केन सूत्रेण भवति ?

उत्तरम् 'जुहोत्यादिभ्यः श्लुः' इति सूत्रेण शपः श्लुः भवति।

(42) 'ददति' इति रूपं कुत्र भवति कस्य धातोः ?

उत्तरम् → ददति इति रूपं 'डुदाञ् दाने' इति धातोः लट्लकारे प्रथमपुरुषस्य बहुवचने भवति।

(43) 'दिवु' धातोः अर्थं लिखत ?

उत्तरम् → 'दिवु' क्रीडाविजीगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु' इत्यर्थे भवति।

(44) 'दिवादिभ्यः' धातुभ्यः कः विकरणः भवति ?

उत्तरम् → 'दिवादिभ्यः श्यन्' इति सूत्रेण श्यन् भवति।

(45) 'जनी' धातोः आदेशः केन सूत्रेण भवति ?

उत्तरम् → जनी धातोः आदेशः 'ज्ञाजनोर्जा' इति सूत्रेण भवति।

(46) 'जनी' प्रादुर्भावे इति धातुः आत्मनेपदिनः परस्मैपदिनः वा

उत्तरम् → आत्मनेपदिनः। यथा - जायते

(47) को नाम अभिषवः ?

उत्तरम् → अभिषवः स्नपनं पीडनं स्नानं सुरासंधानं च।

(48) 'सुनोति' इत्यत्र केन सूत्रेण श्नुः ?

उत्तरम् → 'सुनोति' इत्यत्र 'स्वादिभ्यः श्नुः' इति सूत्रेण श्नुः।

(49) 'प्रणिचिनोति' इत्यत्र कः धातुः कस्मिन्नर्थे च विद्यते ?

उत्तरम् → 'प्रणिचिनोति' इत्यत्र 'चिञ् चयने' धातुः अर्थे च विद्यते ।

(50) तुदादिभ्यः धातुभ्यः कः विकरणः केन च सूत्रेण भवति ?

उत्तरम् → तुदादिभ्यः धातुभ्यः शः विकरणः 'तुदादिभ्यः शः' इति सूत्रेण भवति ।

(51) 'वृश्चति' इत्यत्र धातुः धात्वर्थं च लिखत ?

उत्तरम् → वृश्चति इत्यत्र ओव्रश्चू धातुः छेदने अर्थे विद्यते ।

(52) रुधादिभ्यः धातुभ्यः कः विकरणः भवति ?

उत्तरम् → रुधादिभ्यः धातुभ्यः 'रुधादिभ्यः श्नम्' इति सूत्रेण श्नम् भवति ।

(53) रुधिर् धातोः अर्थं लिखत ?

उत्तरम् → रुधिर् आवरणे इत्यर्थः ।

(54) 'तनोति' इत्यत्र धातुं धात्वर्थं च लिखत ?

उत्तरम् → तनोति इत्यत्र तनु धातुः विस्तारे अर्थे च विद्यते ।

(55) तनु धातुः स्वरितेतः अनुदात्तेतः वा ?

उत्तरम् → स्वरितेतः ।

(56) 'संस्करोति' इत्यत्र केन सूत्रेण 'सुट्' भवति ?

उत्तरम् → 'संपरिभ्यां करोतौ भूषणे' इति सूत्रेण भूषणे अर्थे कृ धातोः 'सुट्' भवति ।

(57) 'डुक्रीञ्' धातोः अर्थं लिखत ?

उत्तरम् → डुक्रीञ् द्रव्यविनिमये ।

(58) 'क्रीणाति' इति रूपं केन धातुना निष्पन्नः ?

उत्तरम् → 'क्रीणाति' इति रूपं 'डुक्रीञ्' द्रव्यविनिमये इत्यनेन निष्पन्नः ।

(59) 'लूञ् छेदने' इति धातोः रूपमेकं लिखत ?

उत्तरम् लुनाति । लुनीते ?

(60) 'चुर' धातोः अर्थं लिखत ?

उत्तरम् → चुर स्तेये ।

(61) 'ज्ञप' धातोः अर्थद्वयं लिखत ?

उत्तरम् 'ज्ञप' अयं ज्ञाने ज्ञापने च वर्तते ।

(62) कर्तृ संज्ञा, हेतु संज्ञा च केन सूत्रेण भवति ?

उत्तरम् 'तत्प्रयोजको हेतुश्च' इति सूत्रेण ।

~~(63)~~

(63) 'अतितिष्ठपत्' इत्यत्र उपधायाः उकारेशः केन सूत्रेण भवति?
उत्तरम् → 'अतितिष्ठपत्' इत्यत्र उपधायाः उकारेशः 'तिष्ठतेरित' इति सूत्रेण भवति।

(64) 'गमयति' इत्यत्र इणो गमि णौ परे केन सूत्रेण?
उत्तरम् 'णौ गमिरबोधने' इति सूत्रेण इणो गमिः स्याण्णौ परे। गमयति।

(65) 'जिगमिषति' इत्यत्र कः प्रत्ययः?
उत्तरम् → सन् प्रत्ययः।

(66) 'यङ्' प्रत्यय विधायकं सूत्रं लिखत?
उत्तरम् → 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' इति यङ् प्रत्यय विधायकं सूत्रम्।

(67) पुनः पुनरतिशयेन वा भवति इत्यर्थे किं रूपम्?
उत्तरम् → बोभूयते इति।

(68) 'कुटिलं व्रजति' इत्यर्थे केन सूत्रेण यङ् प्रत्ययः भवति?
उत्तरम् 'नित्यं कौटिल्ये गतौ' इति सूत्रेण कुटिलं व्रजति इत्यर्थे यङ् प्रत्ययः भवति। यथा वाव्रज्यते।

(69) ('यङ् लुक्' विधायकं सूत्रं लिखत?
उत्तरम् 'यङोऽचि च' इति 'यङ् लुक्' विधायकं सूत्रम्।

(70) 'क्यच्' प्रत्ययः केन सूत्रेण भवति?
उत्तरम् → 'सुप आत्मनः क्यच्' इति सूत्रेण क्यच् प्रत्ययः भवति।

(71) 'आत्मनः पुत्रमिच्छति' इत्यर्थे किं रूपम् भवति?
उत्तरम् — पुत्रीयति।

(72) 'पुत्रकाम्यति' इत्यत्र केन सूत्रेण काम्यच् स्यात्?
उत्तरम् 'काम्यच्च' इति सूत्रेण काम्यचस्यात्।

(73) 'लोहितायति' इत्यत्र केन सूत्रेण परस्मैपदम्?
उत्तरम् लोहितायति इत्यत्र 'वा क्यषः' इति सूत्रेण परस्मैपदम्।

(74) 'कष्टायते' इत्यस्य कोऽर्थः?
उत्तरम् पापं कर्तुमुत्सहते इत्यर्थः।

(75) 'शब्दं करोति शब्दायते' इत्यत्र क्यङ् विधायकं सूत्रं लिखत?
उत्तरम् → 'शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे' इति सूत्रेण शब्दायते इत्यत्र क्यङ् प्रत्ययः स्यात्।

(76) 'कण्ड्वादिभ्यः' धातुभ्यः 'यक्' प्रत्ययः केन सूत्रेण कस्मिन्नर्थे च भवति?

उत्तरम्→ 'कण्ड्वादिभ्यो यक्' इति सूत्रेण कण्ड्वादिगणपठितेभ्यः धातुभ्यः नित्यं यक् स्यात् स्वार्थे।

(77) 'व्यतिलुनीते' इत्यत्र केन सूत्रेण आत्मनेपदम्?

उत्तरम् – 'कर्तरि कर्मव्यतिहारे' इति सूत्रेण व्यतिलुनीते इत्यत्र आत्मनेपदम्।

(78) 'निविशते' इत्यत्र केन सूत्रेण आत्मनेपदम्?

उत्तरम् 'नेर्विशः' इति सूत्रेण।

(79) पराजयते इत्यत्र आत्मनेपदविधायकं सूत्रं लिखत?

उत्तरम्→ 'विपराभ्यां जेः' इति।

(80) संतिष्ठते इत्यत्र आत्मनेपदं केन सूत्रेण?

उत्तरम्→ 'समवप्रविभ्यः स्थः' इति सूत्रेण

(81) अनुकरोति, पराकरोति इत्यत्र केन सूत्रेण परस्मैपदम्?

उत्तरम् 'अनुपराभ्यां कृञः' इति सूत्रेण परस्मैपदम्।

(82) 'निगरणचलनार्थेभ्यश्च' इति सूत्रस्य उदाहरणद्वयं लिखत?

उत्तरम् – (1) निगारयति (2) चलयति (3) कम्पयति (4) भोजयति।

(83) 'चिण्भावकर्मणोः' इति सूत्रेण किं विधीयते?

उत्तरम्→ च्लेः चिण् स्यात् भावकर्मवाचिनि त शब्दे परे। अभावि।

(84) अभिज्ञावचने कः लकारः भवति?

उत्तरम् अभिज्ञावचने लृट् लकारः भवति।

(85) 'यजति स्म युधिष्ठिरः' इत्यत्र केन सूत्रेण लट् लकारः।

उत्तरम्→ 'लट् स्मे' इति सूत्रेण।

(86) 'धातोः' इति अधिकारसूत्रं विधिसूत्रं वा?

उत्तरम्→ 'धातोः' इति अधिकारसूत्रम्। आतृतीयसमाप्तेः।

(87) 'वासरूपोऽस्त्रियाम्' इति संज्ञासूत्रं परिभाषासूत्रं वा?

उत्तरम् परिभाषेयम्।

(88) 'कृत्याः' इत्यस्य अधिकारः कस्य प्राक् भवति?

उत्तरम् कृत्याः इत्यस्य अधिकारः ण्वुलः प्राक् भवति?

(89) 'एधनीयं त्वया' इत्यत्र कः प्रत्ययः केन च सूत्रेण?

उत्तरम्→ 'एधनीयं त्वया' इत्यत्र अनीयर् प्रत्ययः 'तव्यत्तव्यानीयरः' इति सूत्रेण।

(90) 'प्रयाणीयम्' इत्यत्र नस्य णत्वं केन सूत्रेण भवति?
उत्तरम् 'कृत्यचः' इति सूत्रेण 'प्रयाणीयम्' इत्यत्र नस्य णत्वं भवति।
(91) 'दानीयो विप्रः' इत्यत्र केन सूत्रेण अनीयर् प्रत्ययः भवति?
उत्तरम् -> 'कृत्यल्युटो बहुलम्' इति सूत्रेण अनीयर् प्रत्ययः भवति।
(92) 'पोरदुपधात्' इति सूत्रेण कः प्रत्ययः भवति उदाहरणमपि लिखेत्?
उत्तरम् 'पोरदुपधात्' इति सूत्रेण 'यत्' प्रत्ययः भवति। यथा शप्यम्।
(93) 'गद्यम्' इत्यत्र कः प्रत्ययः केन च सूत्रेण?
उत्तरम् 'गद्यम्' इत्यत्र यत् प्रत्ययः 'गदमदचरयमश्चानुपसर्गे' इति सूत्रेण।
(94) 'इत्यः' इत्यत्र तुगागमः केन सूत्रेण?
उत्तरम् - 'ह्रस्वस्य पिति कृति तुक्' इति सूत्रेण।
(95) 'मृजेर्विभाषा' इति सूत्रेण किं विधीयते?
उत्तरम् -> मृजेः क्यपवा स्यात्।
(96) 'कार्यम्' इत्यत्र ण्यत् प्रत्ययः केन सूत्रेण?
उत्तरम् -> कार्यम् इत्यत्र 'ऋहलोर्ण्यत्' इति सूत्रेण ण्यत् प्रत्ययः।
(97) ('वाच्यम्' इत्यत्र कुत्व निषेधः केन सूत्रेण?
उत्तरम् -> 'वचोऽशब्दसंज्ञायाम्' इति सूत्रेण 'वाच्यम्' इत्यत्र कुत्व निषेधः भवति। शब्दाख्यार्थे तु वाक्यम् इति प्रयोगः।
(98) 'कारकः' इत्यत्र कः प्रत्ययः केन च सूत्रेण?
उत्तरम् कारकः इत्यत्र 'ण्वुल्तृचौ' इति सूत्रेण ण्वुल् प्रत्ययः।
(99) कर्ता इत्यत्र कः प्रत्ययः केन च सूत्रेण?
उत्तरम् -> कर्ता इत्यत्र 'ण्वुल्तृचौ' इति सूत्रेण कृ धातोः तृच् प्रत्ययः।
(100) 'ल्यु, णिनि, अच्' इति प्रत्ययाः केन सूत्रेण विधीयन्ते?
उत्तरम् -> 'नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः' इति सूत्रेण।
(101) 'बुधः' इत्यत्र कः प्रत्ययः केन सूत्रेण भवति?
उत्तरम् बुधः इत्यत्र कः प्रत्ययः 'इगुपधज्ञाप्रीकिरः कः' इति सूत्रेण भवति।
(102) 'प्रज्ञः' इत्यत्र कः प्रत्ययः केन च सूत्रेण?
उत्तरम् 'आतश्चोपसर्गे' इत्यनेन सूत्रेण कः स्यात् प्रज्ञः इत्यत्र।
(103) ('कुम्भकारः' इत्यत्र अण् प्रत्ययः केन सूत्रेण?
उत्तरम् कुम्भ उपपदे कृ धातोः 'कर्मण्यण्' इति सूत्रेण अण् प्रत्ययः भवति।

(104) 'गोदः' इत्यत्र कः प्रत्ययः केन च सूत्रेण ?
उत्तरम् → 'गोदः' इत्यत्र 'आतोऽनुपसर्गे कः' इति सूत्रेण 'क' प्रत्ययः।
(105) 'कुरुचरः' इत्यत्र कः प्रत्ययः केन च सूत्रेण ?
उत्तरम् → 'चरेष्टः' इति सूत्रेण 'ट' प्रत्ययः।
(106) दिवाकरः विभाकरः इत्यत्र कः प्रत्ययः ?
उत्तरम् → दिवाकरः विभाकरः इत्यत्र 'ट' प्रत्ययः।
(107) 'जनमेजयः' इत्यत्र मुमागमः केन सूत्रेण ?
उत्तरम् → 'अरुर्द्विषदजन्तस्य मुम्' इति सूत्रेण जनमेजयः इत्यत्र मुमागमः।
(108) 'सूर्यं न पश्यन्ति' इति विग्रहे किं रूपम्।
उत्तरम् → सूर्यं न पश्यन्तीत्यसूर्यंपश्या राजदाराः इति।
(109) प्रियंवदः, वशंवदः केन सूत्रेण कः प्रत्ययः ?
उत्तरम् → 'प्रियवशे वदः खच्' इति सूत्रेण वद धातोः खच् प्रत्ययः।
(110) 'कुमारघाती' इत्यत्र कः प्रत्ययः ?
उत्तरम् → 'कुमारशीर्षयोर्णिनिः' इत्यनेन णिनि प्रत्ययः।
(111) उष्णभोजी, शीतभोजी इत्यत्र कः प्रत्ययः केन च सूत्रेण ?
उत्तरम् उष्णभोजी, शीतभोजी इत्यत्र 'सुप्यजातौ णिनिस्ताच्छील्ये' इति सूत्रेण अजात्यर्थे सुपि धातोर्णिनिः प्रत्ययः ताच्छील्ये द्योत्ये।
(112) 'निष्ठा' संज्ञा विधायकं सूत्रं किम् ?
उत्तरम् → 'क्तक्तवतू निष्ठा' इति निष्ठा संज्ञा विधायकं सूत्रम्।
(113) 'क्त' प्रत्ययः कस्मिन्नर्थे भवति ?
उत्तरम् – 'तयोरेव कृत्यक्तखलर्थाः' इति सूत्र निर्देशेन 'भावकर्मणोः क्तः।
(114) 'शीर्णः' इत्यत्र ~~[illegible] [illegible] केन सूत्रेण~~ निष्ठा प्रत्ययस्य तकारस्य नकारः केन सूत्रेण भवति ?
उत्तरम् → 'शीर्णः' इत्यत्र निष्ठा प्रत्ययस्य तकारस्य नकारः 'रदाभ्यां निष्ठातो नः पूर्वस्य च दः' इति सूत्रेण भवति।
(115) 'दा' इत्यस्य 'दद्' आदेशः केन सूत्रेण भवति ?
उत्तरम् → 'दो दद्घोः' इति सूत्रेण घुसंज्ञकस्य 'दा' इत्यस्य दद् स्यात्तादौ किति चर्वम्। क्तः।
(116) 'पूजितः' इत्यत्र क्त प्रत्ययः केन सूत्रेण ?
उत्तरम् 'मतिबुद्धिपूजार्थेभ्यश्च' इति सूत्रेण पूजितः इत्यत्र क्त प्रत्ययः।

(117) 'शतृ' 'शानच्' प्रत्यय-विधायकं सूत्रं लिखत?

उत्तरम्→ 'लटः शतृशानचावप्रथमासमानाधिकरणे' इति 'शतृ' शानच् प्रत्ययविधायकं सूत्रम्।

(118) 'पवमानः' 'यजमानः' इत्यत्र कः प्रत्ययः?

उत्तरम् 'पवमानः' 'यजमानः' इत्यत्र 'पूङ्यजोः शानन्' इति सूत्रेण शानन् प्रत्ययः।

(119) 'अलंकरिष्णुः' इत्यत्र कः प्रत्ययः?

उत्तरम्→ इष्णुच् प्रत्ययः।

(120) 'षाकन्' प्रत्ययः केन सूत्रेण विधीयते?

उत्तरम्– 'जल्पभिक्षकुट्टलुण्टवृङः षाकन्' इति षाकन् प्रत्यय विधायकं सूत्रम्। यथा – जल्पाकः, भिक्षाकः।

(121) चिकीर्षुः इत्यत्र कः प्रत्ययः केन च सूत्रेण

उत्तरम्– 'सनाशंसभिक्ष उः' इत्यनेन 'उ' प्रत्ययः।

(122) 'चरित्रम्' इत्यत्र कः प्रत्ययः केन च सूत्रेण?

उत्तरम्→ 'अर्तिलूधूसूखनसहचर इत्रः' इति सूत्रेण 'इत्र' प्रत्ययः।

(123) सत्संज्ञा विधायकं सूत्रं लिखत?

उत्तरम्→ 'तौ सत्' इति तौ शतृशानचौ सत्संज्ञौ स्तः।

अतिलघुत्तरीय प्रश्नाः - लघुत्तरीयास्य प्रश्नाः —

① उचित युग्ममेलनं कुरुत -

① भू - हर्षे
② एध - व्यक्तायां वाचि
③ मुद - वृद्धौ
④ गद - सत्तायां

उत्तरम् - ① सत्तायां ② वृद्धौ ③ हर्षे ④ व्यक्तायां वाचि

② - ① बभूव - लट्लकारः
② भविता - लिट्लकारः
③ भविष्यति - लुट्लकारः
④ भवामि - लृट्लकारः

उत्तरम् → ① लिट्लकारः ② ~~भवि~~ लुट्लकारः ③ लृट्लकारः
④ लट्लकारः

③ ① - विधिः - सत्कारपूर्वकोव्यापारः
② निमन्त्रणम् - कामचारानुज्ञा
③ आमन्त्रणम् - नियोगकरणम्
④ अधीष्टः - प्रेरणम्

उत्तरम् → ① प्रेरणम् ② नियोगकरणम् ③ कामचारानुज्ञा ④
④ सत्कारपूर्वकोव्यापारः

④ ① कारकः - णिच्
② कर्ता - ल्युट्
③ नन्दनः - तृच्
④ जनार्दनः - ण्वुल्

उत्तरम् ① ण्वुल् ② तृच् ③ ~~तृच्~~ ल्युट् ④ णिच्

⑤ ① कुम्भकारः - गां ददाति
② कुरुचरः - तन्तुं वयति
③ गोदः - ग्राम्यां पिबति
④ द्विपः - कुम्भं करोति
⑤ तन्तुवायः - कुरौ चरति

उत्तरम् - ① कुम्भं करोति ② कुरौ चरति ③ गां ददाति ④ ग्राम्यां पिबति
⑤ तन्तुं वयति।

⑥ ① पचेलिमाः – वास्तव्यः
② भिदेलिमाः – धर्मः
③ वलतीति – माषाः
④ पचनीयः – सरलाः

उत्तरम् – ① माषाः ② सरलाः ③ वास्तव्यः ④ धर्मः

⑦ ① त – उत्तमपुरुषः एकवचनम्
② थास – प्रथमपुरुषः एकवचनम्
③ इट् – मध्यमपुरुषः एकवचनम्
④ झ – प्रथमपुरुषः बहुवचनम्

उत्तरम् → ① प्रथमपुरुषः एकवचनम् ② मध्यमपुरुषः एकवचनम्
③ उत्तमपुरुषः एकवचनम् ④ प्रथमपुरुषः बहुवचनम्

⑧ ① पठितुमिच्छति – पिपृच्छिषति
② गन्तुमिच्छति – जिगमिषति
③ तर्तुमिच्छति – पिपठिषति
④ प्रष्टुमिच्छति – तितीर्षति

उत्तरम् → ① पिपठिषति ② तितीर्षति ③ जिगमिषति
④ पिपृच्छिषति।

⑨ ① पुनः पुनः अतिशयेन वा भवति – विद्वायते
② कुटिलं व्रजति – बोभूयते
③ विद्वान् इव आचरति – लोहितायति
④ अलोहितो लोहितो भवति – वाव्रज्यते

उत्तरम् → ① बोभूयते ② वाव्रज्यते ③ विद्वायते
④ लोहितायति।

⑩ ① इत्यः – शास् + क्यप्
② शिष्यः – इण् + क्यप्
③ मृज्यः – कृ + ण्यत्
④ कार्यम् – मृज् + क्यप्

① ~~शास् + क्यप्~~

① इण् + क्यप् ② शास् + क्यप् ③ मृज् + क्यप्
④ कृ + ण्यत्

(11) (1) चेयम् - तव्यत्तव्यानीयरः
(2) एधितव्यम् - अचो यत्
(3) पचमानं चैत्रं पश्य - शतृ प्रत्ययः
(4) पचन्तं चैत्रं पश्य - आने मुक्

उत्तरम् - (1) अचो यत् (2) तव्यत्तव्यानीयरः (3) आने मुक्
(4) शतृ प्रत्ययः

(12) एकपदेन उत्तरं लिखत —
(1) जुहवांचकार इति कस्य धातोः रूपम् ?
उत्तरम् हु धातोः।
(2) 'कंडूञ्' धातोः अर्थं लिखत ?
उत्तरम् कंडूञ् गात्रविघर्षणे।
(3) निष्ठा संज्ञा कयोः प्रत्ययोः भवति ?
उत्तरम् क्त, क्तवतु।
(4) भावकर्मणोः सूत्रघटके कर्म पदं किं परम् ?
उत्तरम् - कर्मकारकपरम्।
(5) षिवु धातोः कोऽर्थः ?
उत्तरम् - षिवु तन्तुसन्ताने।
(6) राध्यत्योदनः इति वाक्यस्य कोऽर्थः ?
उत्तरम् → सिध्यति ओदनः इत्यर्थः।
(7) षुञ् धातोः कोऽर्थः ?
उत्तरम् षुञ् अभिषवे।
(8) तुर् धातोः अर्थं लिखत ?
उत्तरम् → तुर् त्वरणे
(9) मृश् आमर्शने इत्यत्र आमर्शन पदार्थः कः ?
उत्तरम् आमर्शनं स्पर्शः।
(10) रुधिर् आवरणे धातोः लटि प्रथमपुरुषैकवचने किं रूपम् ?
उत्तरम् → रुणद्धि।
(11) णिच् प्रत्ययान्तस्य उदाहरणं लिखत ?
उत्तरम् → भावयति।
(12) अत्तुमिच्छति इत्यर्थे किं रूपम् ?
उत्तरम् → जिघत्सति।
(13) रुरुदिषति पदस्य कोऽर्थः ?
उत्तरम् — रोदितुमिच्छति।

(14) कदा धातोः यङ् भवति ?
उत्तरम् क्रियासमभिहारे द्योत्ये ।
(15) गत्यर्थकात् धातोः कस्मिन् अर्थे यङ् भवति ?
उत्तरम् - कौटिल्यगतौ ।
(16) विद्वान् इव आचरति इत्यर्थे किं रूपम् ?
उत्तरम् - विद्वायते ।
(17) उण्ड्गादीनां द्वौ भेदौ कौ ?
उत्तरम् - धातवः प्रातिपदिकानि च ।
(18) 'आस्थत्' इत्यत्र थुगागमः भवति ?
उत्तरम् - 'अस्यतेस्थुक्' इत्यनेन
(19) 'स्मरसि कृष्ण गोकुले वत्स्यामः' इत्यत्र लृट्लकारः केन सूत्रेण ?
उत्तरम् - अभिज्ञावचने लृट् ।
(20) 'सन्तिष्ठते' इत्यत्र केन आत्मनेपदम् ?
उत्तरम् → 'समवप्रविभ्यः स्थः' ।
(21) निगारयति इत्यत्र केन सूत्रेण परस्मैपदम् ?
उत्तरम् → 'निगरणचलनार्थेभ्यश्च' ।
(22) कृदन्तप्रत्ययाः अष्टाध्यायाः कस्मिन्नध्याये वर्णिताः ?
उत्तरम् → तृतीयाध्याये ।
(23) कृदन्तप्रत्ययाः केभ्यो भवन्ति ?
उत्तरम् - धातुभ्यः ।
(24) कृत् प्रत्ययाः कस्मिन् भवन्ति ?
उत्तरम् - भावकर्मणोः ।
(25) पण्डितमात्मानं मन्यते इत्यस्मिन्नर्थे किं रूपम् ?
उत्तरम् - पण्डितम्मन्यः
(26) कुरुषु चरतीत्यर्थे किं रूपम् ?
उत्तरम् - कुरुचरः
(27) कुक्षु शृणातीत्यर्थे किं रूपम् ?
उत्तरम् - कुशर्मा
(28) सरसि जातमित्यर्थे किं रूपम् ?
उत्तरम् - सरसिजम्, सरोजम् ।
(29) सोमेनेष्टवान् इत्यर्थे किं सिद्धं रूपम् ?
उत्तरम् - सोमयाजी

(30) क्त प्रत्ययः कस्मिन्नर्थे भवति ?
उत्तरम् → भूतार्थे

(31) 'चयः' इत्यत्र केन सूत्रेण ~~एरच्~~ अच् प्रत्ययः भवति ?
उत्तरम् → 'एरच्'

(32) 'भ्वादिप्रकरणे' अन्तिमो धातुः कः ?
उत्तरम् → 'टुओश्वि गतिवृद्ध्योः'।

(33) धातुः तेषां अर्थं च अधोलिखितानि सन्ति

| | धातुः | | अर्थः |
|---|---|---|---|
| (1) | मुद् | – | हर्षे |
| (2) | भूष् | – | शरणे |
| (3) | गद् | – | व्यक्तायां वाचि |
| (4) | भ्राजृ | – | दीप्तौ |
| (5) | गुपू | – | रक्षणे |
| (6) | कमु | – | कान्तौ, कान्तिरिच्छा |
| (7) | ष्ठिवु | – | निरसने |
| (8) | वृतु | – | वर्तने |
| (9) | हन् | – | हिंसागत्योः |
| (10) | ऊर्णुञ् | – | आच्छादने |
| (11) | ब्रूञ् | – | परिभाषणे |
| (12) | ब्रू | – | व्यक्तायां वाचि |
| (13) | अद् | – | भक्षणे |
| (14) | शीङ् | – | शयने |
| (15) | डुपचष् | – | पाके |

(34) अजः, द्विजः इत्यत्र 'ड' प्रत्ययः केन सूत्रेण
उत्तरम् → 'अन्येष्वपि दृश्यते'।

(35) 'विष्णुर्विश्वं कृतवान्' इत्यत्र केन सूत्रेण क्तवतु प्रत्ययः ?
उत्तरम् → 'निष्ठा'

(37) तिप्तस्झि० इत्यादि सूत्रं प्रपूरयत ?
उत्तरम् → तिप्तस्झिसिप्थस्थमिब्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ्।

(38) परस्मैपदानां णल० इति सूत्रं प्रपूरयत ?
उत्तरम् → 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति।

(39) उपसर्गात्सुनोति० इति सूत्रं प्रपूरयत ?
उत्तरम् → उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनय-
-सेधसिचसञ्जस्वञ्जाम् । इति ।
(40) 'नेर्गदनद०' इति सूत्रं प्रपूरयत ?
उत्तरम् नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहति-
-शाम्यतिचिनोतिदेग्धिषु च । इति ।
(41) 'दीपजनबुधपूरि०' इति सूत्रं प्रपूरयत ?
उत्तरम् → दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम् । इति ।
(42) 'पाघ्राध्मास्था०' इति सूत्रं प्रपूरयत ?
उत्तरम् → पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्तिशदसदां पिबजिघ्रधमतिष्ठ-
-मनयच्छपश्यर्च्छधौशीयसीदाः । इति
(43) 'ग्रहिज्यावयि०' इति सूत्रं प्रपूरयत ?
उत्तरम् – ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां
ङिति च ।
(44) 'सत्यापपाश०' इति सूत्रं प्रपूरयत ?
उत्तरम् → सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्ण-
-चुरादिभ्यो णिच् । इति ।
(45) 'धातोरेकाचो हलादेः०' इति सूत्रं प्रपूरयत ?
उत्तरम् → 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' । इति ।
(46) 'मुण्डमिश्र०' इति सूत्रं प्रपूरयत ?
उत्तरम् → मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो
णिच् । इति ।
(47) 'गन्धनावक्षेपण०' इति सूत्रं प्रपूरयत ?
उत्तरम् → गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु
कृञः । इति ।
(48) 'अवद्यपण्यवर्या०' इति सूत्रं प्रपूरयत ?
उत्तरम् → अवद्यपण्यवर्या गर्ह्यपणितव्यानिरोधेषु । इति ।
(49) 'राजसूयसूर्य०' इति सूत्रं प्रपूरयत ?
उत्तरम् – राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः । इति ।
(50) 'दिवाविभा०' इति सूत्रं प्रपूरयत ?
उत्तरम् → दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबि-
बलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्तद्धनुररुष्षु । इति ।

दीर्घोत्तरीय प्रश्नाः —

(1) 'भू' धातोः आशीर्लिङ्लकारे लृङ्लकारे-च रूपाणि लिखत ?

उत्तरम् — आशीर्लिङ्लकारः → भूयात् भूयास्ताम् भूयासुः
भूयाः भूयास्तम् भूयास्त
~~लृङ्लकारः~~ — भूयासम् भूयास्व भूयास्म
लृङ्लकारः → अभविष्यत् अभविष्यताम् अभविष्यन्
अभविष्यः अभविष्यतम् अभविष्यत
अभविष्यम् अभविष्याव अभविष्याम

(2) 'डुक्रीञ्' द्रव्यविनिमये इति धातोः लटि लुटि-च रूपाणि लिखत ?

उत्तरम् → लटि → क्रीणाति क्रीणीतः क्रीणन्ति
क्रीणासि क्रीणीथः क्रीणीथ
क्रीणामि क्रीणीवः क्रीणीमः
लुटि → क्रेता क्रेतारौ क्रेतारः
क्रेतासि क्रेतास्थः क्रेतास्थ
क्रेतास्मि क्रेतास्वः क्रेतास्मः

(3) रुध् धातोः लटि लृटि-च रूपाणि लिखत ?

उत्तरम् — लटि — रुणद्धि रुन्धः, रुन्द्धः रुन्धन्ति
रुणत्सि रुन्धः, रुन्द्धः रुन्ध, रुन्द्ध
रुणध्मि रुन्ध्वः रुन्ध्मः
लृटि — रोत्स्यति रोत्स्यतः रोत्स्यन्ति
रोत्स्यसि रोत्स्यथः रोत्स्यथ
रोत्स्यामि रोत्स्यावः रोत्स्यामः

(4) 'गुपू' रक्षणे इति धातोः लिट्लकारस्य प्रथमपुरुषे मध्यमपुरुषे-च रूपाणि लिखत ?

उत्तरम् → लिट्लकारः, म)
प्रथमपुरुषः — जुगोप, जुगुपतुः जुगुपुः
गोपायाञ्चकार, गोपायाञ्चक्रतुः गोपायाञ्चक्रुः
गोपायाम्बभूव, गोपायाम्बभूवतुः गोपायाम्बभूवुः
गोपायामास, गोपायामासतुः गोपायामासुः
मध्यमपुरुषः — जुगोपिथ जुगुपथुः जुगुप
जुगोप्थ गोपायाञ्चक्रथुः गोपायाञ्चक्र
गोपायाञ्चकर्थ गोपायाम्बभूवथुः गोपायाम्बभूव
गोपायामासिथ गोपायाम्बभूविथ गोपायामासथुः गोपायामास

(5) 'डुदाञ्' दाने इति धातोः आत्मनेपदे लटि आशीर्लिङि च रूपाणि लिखत ?

उत्तरम् → लटि →

| | | |
|---|---|---|
| दत्ते | ददाते | ददते |
| दत्से | ददाथे | दद्ध्वे |
| ददे | दद्वहे | दद्महे |

आशीर्लिङि →

| | | |
|---|---|---|
| दासीष्ट | दासीयास्ताम् | दासीरन् |
| दासीष्ठाः | दासीयास्थाम् | दासीध्वम् |
| दासीय | दासीवहि | दासीमहि |

(6) भवति इति रूपं प्रक्रियया साधयत ?

उत्तरम् - भवति - भू - सत्तायामित्यस्माद्धातोः लट्लकारे तत्स्थाने परस्मैपदे तिप् प्रत्यये अनुबन्धलोपे च कृते 'भू-ति' इत्यवस्थायां 'तिङ्शित्सार्वधातुकम्' इति सूत्रेण सार्वधातुकसंज्ञायां 'सार्वधातुकार्धधातुकयोः' इति गुणे प्राप्ते 'भूसुवोस्तिङि' इति निषेधे 'कर्तरि शप्' इति शपि अनुबन्धलोपे सार्वधातुकत्वात् 'सार्वधातुकार्धधातुकयोः' इति गुणे अवादेशे वर्णसम्मेलने च कृते सति भवति इति प्रयोगः साधुतां याति।

(7) 'बभूव' इति प्रयोगः साधनीयः ?

उत्तरम् → बभूव → भू सत्तायाम् इत्यस्माद्धातोः लिट्यनुबन्धलोपे लः स्थाने तिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण तिपो णलादेशेऽनुबन्धलोपे भू-अ इति जाते कित्वात् गुणवृद्धी बाधित्वा 'भुवो वुग्लुङ्लिटोः' इति भूधातोर्वुगागमेऽनुबन्धलोपे कित्वादाद्यवयवे जाते 'भुव् अ' इति दशायां 'लिटि धातोरनभ्यासस्य' इति सूत्रेण द्वित्वेऽभ्यासादिकार्ये 'भू भूव् अ' इति जाते 'ह्रस्वः' इति ह्रस्वत्वे 'भवतेरः' इति अभ्यासोकारस्य अकारे 'भ-भूव-अ' इति जाते 'अभ्यासे चर्च' इत्यनेन सूत्रेण अभ्यासजसंज्ञकस्य भस्य बत्वे च कृते सति 'बभूव' इति प्रयोगः सिद्ध्यति।

(8) 'एधस्व' इति प्रयोगं साधयत ?

उत्तरम् → एधस्व - एध धातोः 'लोट् च' इति लोटि तत्स्थाने आत्मनेपदे मध्यमपुरुषैकवचने थास् प्रत्यये 'थासः से' इति थासः 'से' आदेशे

एध् + से इति भूते 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकसंज्ञायां 'कर्तरि शप्' इति शपि अनुबन्धलोपे एध् + अ + से इति जाते 'आमेतः' इति एकारस्यामादेशे प्राप्ते तं प्रबाध्य 'सवाभ्यां वामौ' इति से प्रत्ययस्य एकारस्य व आदेशे 'एधस्व' इति रूपं साधुतां याति।

(9) सिषेधिथ – षिध गत्याम् इत्यस्माद्धातोः लिटि तत्स्थाने मध्यमपुरुषैकवचने सिपि 'परस्मैपदानां णलतुसुस्थलथुसणल्वमाः' इति सूत्रेण सिपः थलादेशेऽनुबन्धलोपे षत्वे सत्वे 'सिध् + थ' इति दशायां 'लिटि धातोरनभ्यासस्य' इति द्वित्वेऽभ्यासत्वे हलादिशेषे सि सिध् थ इति जाते 'लिट् च' इत्यार्धधातुकसंज्ञायां 'पुगन्तेति उपधागुणे 'आदेशप्रत्यययोः' इति सस्य षत्वे 'आर्धधातुकस्येड्वलादेः' इति इडागमे 'सिषेधिथ' इति रूपं सिद्धम्।

(10) 'जुगुप्सते' इति रूपं साधयत?

उत्तरम् जुगुप्सते – गुप्धातोः निन्दागम्यमाने 'गुप्तिज्किद्भ्यः सन्' इति सन् प्रत्यये 'सन्यङोः' इति द्वित्वे अभ्याससंज्ञायां हलादिशेषे 'कुहोश्चुः' इति गस्य जकारे 'जुगुप्स इति जाते 'सनाद्यन्ता धातवः' इति धातुसंज्ञायां लट्लकारे तत्स्थाने आत्मनेपदे तप्रत्यये तङः सार्वधातुकत्वात् शपि जुगुप्स + अ + त इति जाते 'टित आत्मनेपदानां टेरे' इति टेरेत्वे 'अतो गुणे' इति गुणे पररूपे 'जुगुप्सते' इति रूपं सिद्धं भवति।

(11) 'अत्ति' इति प्रयोगं साधयत?

उत्तरम् → 'अत्ति' – 'अद् भक्षणे' इति धातोर्लटि तत्स्थाने तिपि 'तिङ्शित्सार्वधातुकम्' इति सार्वधातुकत्वे 'कर्तरि शप्' इति शपि 'अदिप्रभृतिभ्यः शपः' इति शपो लुकि 'खरि च' इति चर्त्वे अत्ति इति रूपं सिद्ध्यति।

(12) अवोचत इति रूपं साधयत?

उत्तरम् → अवोचत् – 'ब्रूञ् व्यक्तायां वाचि' इत्यस्माद्धातोः लुङ्लकारे तत्स्थाने तिपि अडागमे 'इतश्च' इति तिप इकारलोपे 'च्लि लुङि' इति च्लौ च्लेः सिचि प्राप्ते 'अस्यतिवक्तिख्यातिभ्योऽङ्' इति च्लेरङादेशे अनुबन्धलोपे 'ब्रुवो वचिः' इति वचादेशे 'वच उम्' इति अकारात् परतः उमागमे 'अ + व + उ + च् + अ + त्' इत्यवस्थायां गुणे, संयोगे च कृते सति अवोचत् इति रूपं सिद्धम्।

(13) जुहोति इति प्रयोगं साधयत ?

उत्तरम् जुहोति → 'हु' दानाऽऽदनयोः इत्यस्माद्धातोः लट्लकारे तत्स्थाने तिपि अनुबन्धलोपे सार्वधातुकसंज्ञायां शपि 'जुहोत्यादिभ्यः श्लुः' इत्यनेन सूत्रेण शपः श्लावादेशेऽनुबन्धलोपे 'श्लौ' इत्यनेन द्वित्वे अभ्याससंज्ञायां 'कुहोश्चुः' इति चुत्वे 'सार्वधातुकार्धधातुकयोः' इति गुणे 'जुहोति' इति रूपं सिद्धम् ।

(14) दिदीये इति रूपं साधयत ?

उत्तरम् — 'दीङ्-क्षये' इत्यस्माद्धातोरात्मनेपदे लिटि तत्स्थाने तप्रत्यये 'लिटस्तझयोरेशिरेच्' इत्यनेन सूत्रेण एशादेशे 'लिटि धातोरनभ्यासस्य' इत्यनेन द्वित्वे अभ्यासत्वे ह्रस्वे दि+दी+ए इति स्थिते 'दीङो युडचि क्ङिति' इत्यनेन युडागमेऽनुबन्धलोपे 'दिदीये' इति । न च आभीयत्वेन युटः असिद्धत्वात् 'एरनेकाचः' इति यण् स्यादिति वाच्यम् 'वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ' इति वार्तिकेन युटः सिद्धत्वज्ञापनात् ।

(15) 'अकार्षीत्' इति प्रयोगं साधयत ?

उत्तरम् — अकार्षीत् → कृधातोर्लुङ्लकारे तत्स्थाने तिपि च्लौ 'लुङ्लङ्' इत्यडागमे 'इतश्च' इति तिप इकारलोपे मध्ये च्लौ तस्य सिचि 'सस्यार्धधातुकत्वादिटि प्राप्ते 'एकाच उपदेशेऽनुदात्तात्' इति निषेधे 'अस्तिसिचोऽपृक्ते' इति तस्य ईटि 'सिचि वृद्धिः परस्मैपदेषु' इत्यनेन वृद्धौ सस्य षत्वे 'अकार्षीत्' इति रूपं सिद्धम् ।

(16) भावयति — इति प्रयोगं साधयत ?

उत्तरम् भावयति — 'भू' सत्तायाम् इत्यस्माद्धातोः 'हेतुमति च' इति णिचि अनुबन्धलोपे 'भू इ' इति जाते 'अचो ञ्णिति' इति वृद्धौ आवादेशे भावि इति स्थितौ 'सनाद्यन्ता धातवः' इत्यनेन धातुसंज्ञायां लटि शपि अनुबन्धलोपे गुणे अयादेशे च कृते सति भावयति इति रूपं सिद्ध्यति ।

(17) जिघत्सति — इति रूपं साधयत ?

उत्तरम् जिघत्सति — अत्तुमिच्छतीति विग्रहे 'अद-भक्षणे' इत्यस्माद्धातोः 'धातोः कर्मणः समानकर्तृकादिच्छायां वा' इत्यनेन सूत्रेण सन् प्रत्यये

अनुबन्धलोपे 'पठ् स' इति जाते 'आर्धधातुकं शेषः' इत्यनेन सनः आर्धधातुकत्वे 'सन्यङोः' इति द्वित्वेऽभ्यासकार्ये हलादिशेषे 'प पठ् स' इति स्थिते 'सन्यतः' इत्यभ्यासस्य इत्वे 'आर्धधातुकस्येड्वलादेः' इति इटि सस्य षत्वे 'पिपठिष' इति जाते ततः धातुसंज्ञायां लटि तिपि शपि अनुबन्धलोपे 'अतो गुणे' इति पररूपे 'पिपठिषति' इति रूपं सिद्ध्यति।

(18) नरीनृत्यते इति प्रयोगं साधयत ?

उत्तरम्- नरीनृत्यते- पुनः पुनः अतिशयेन भृशं वा नृत्यति इत्यस्मिन् विग्रहे नृती गात्रविक्षेपे इति धातोः यङि 'सन्यङोः' इति द्वित्वेऽभ्यासत्वे उरदत्वे हलादिशेषे 'रीगृदुपधस्य च' इति रीगागमेऽनुबन्धलोपे यङन्तत्वात् धातुसंज्ञायां लटि तप्रत्यये टेरेत्वे शपि 'अतो गुणे' इति पररूपे च कृते सति नरीनृत्यते इति रूपम्।

(19) कष्टायते इति प्रयोगं कथं सिद्ध्यति ?

उत्तरम्→ कष्टायते- कष्टाय क्रमते इति विग्रहे कष्टशब्दात् 'कष्टाय क्रमणे' इति सूत्रेण क्यङ् प्रत्यये अनुबन्धलोपे 'कष्ट-य' इति स्थिते 'अकृत्सार्वधातुकयोः' इति दीर्घे धातुत्वाल्लटि ङित्वादात्मनेपदे त प्रत्यये शपि टेरेत्वे च कृते सति 'कष्टायते' इति रूपं सिद्ध्यति।

(20) व्यतिलुनीते इति प्रयोगं साधयत ?

उत्तरम्- व्यतिलुनीते- अन्यस्य योग्यं लवनमन्यः करोतीति विग्रहे वि-अति पूर्वात् लूञ्-छेदने इत्यस्माद्धातोः लटि 'कर्तरि कर्मव्यतिहारे' इत्यनेन कर्तृगेऽपि फले आत्मनेपदे तेन त प्रत्यये श्नाप्रत्यये ईत्वे टेरेत्वे च कृते सति व्यतिलुनीते इति रूपं सिद्ध्यति।

## विश्लेषणात्मकप्रश्नाः –

(1) 'एधितव्यम्' इत्यत्र कः प्रत्ययः कथं च अस्य प्रयोगस्य सिद्धिः।

उत्तरम् → एध- वृद्धौ इत्यस्माद्धातोः 'कर्तरि कृत्' इति सूत्रं प्रबाध्य 'तयोरेव कृत्यक्तखलर्थाः' इति नियमेन 'तव्यत्तव्यानीयरः' इत्यनेन तव्यप्रत्यये तस्यार्धधातुकत्वात् इटि 'एधितव्य' इति स्थितौ 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञायां भावे औत्सर्गिकं क्लीबत्वञ्च इत्यनेन क्लीबत्वात् सोरमि पूर्वरूपे च कृते सति एधितव्यमिति प्रयोगः सिद्ध्यति।

(2) 'शिष्यः' इति प्रयोगः केन रीत्या ग्रन्थे समासादितः?

उत्तरम् → शासु- अनुशिष्टौ इति धातोः 'एतिस्तुशास्वृदृजुषः क्यप्' इति क्यपि अनुबन्धलोपे 'शास इदङ्हलोः' इत्यनेन उपधायाः इत्वे कृते 'शासिवसिघसीनाञ्च' इति षत्वे विभक्तिकार्ये शिष्यः इति रूपं सिद्ध्यति।

(3) कर्ता- कारकः इति प्रयोगद्वयोः सिद्धिः कथम्?

उत्तरम् → करोतीति विग्रहे डुकृञ्धातोः 'ण्वुल्तृचौ' इति सूत्रेण तृचि प्रत्यये अनुबन्धलोपे गुणे रपरत्वे कर्तृशब्दात् प्रातिपदिकत्वे सौ 'ऋदुशनः' इत्यनङि 'अप्तृन्तृच्' इति उपधादीर्घे सुलोपे 'न लोपः प्रातिपदिकान्तस्य' इति न लोपे कर्ता इति रूपं। पक्षे- ण्वुल् प्रत्यये अनुबन्धलोपे 'युवोरनाकौ' इत्यनेन वोरकादेशे 'कृ-अक' इति जाते णित्वात् वृद्धौ रपरत्वे कारक शब्दात् प्रातिपदिकत्वात् विभक्तिकार्ये कारकः इति रूपं सिद्ध्यति।

(4) 'यशस्करी' इति प्रयोगः कथं साधुः?

उत्तरम् → विद्याया यशो हेतुत्वात् यशः करोतीति विग्रहे यशः उपपदे कृधातोः 'कृञो हेतुताच्छील्यानुलोम्येषु' इति सूत्रेण टप्रत्यये गुणे रपरत्वे 'कर्तृकर्मणोः कृति' इति कर्म-षष्ठ्याम् 'गतिकारकेति' सुबुत्पत्तेः प्रागेव यश-अस्-कर इति दशायां 'उपपदमतिङ्' इति सूत्रेण समासे सुपो लुकि सस्य रुत्वे विसर्गे 'यशः कर' इति जाते 'अतः कृकमि-' इति विसर्गस्य सत्वे स्त्रीत्वे टित्वात् ङीपि भत्वात् 'यस्येति च' इति अकारलोपे ङ्यन्तत्वात् सौ हल्ङ्यादिना सुलोपे यशस्करी इति रूपं साधुः।

(5) 'भास्करः' इति प्रयोगः दीक्षितेन कथं संसाधितः ग्रन्थे ?

उत्तरम् → भासः करोतीति विग्रहे 'भास् अस्' इत्युपपदे कृधातोः 'दिवाविभानिशा॰' इति सूत्रेण ट प्रत्यये अनुबन्धलोपे गुणे रपरत्वे च कृते सुबलुकि सकारस्य रुत्वे विसर्गे 'कस्कादिषु चेति' सूत्रेण सत्वे विभक्तिकार्ये च भास्करः इति रूपं ~~सिद्धः~~। संसाधितः ग्रन्थे।

(6) 'कुम्भकारः' इति प्रयोगः साधनीयः ?

उत्तरम् → कुम्भं करोतीति विग्रहे 'कुम्भ अस् कार' इति अलौकिक विग्रहे 'तत्रोपपदं सप्तमीस्थम्' इति कुम्भशब्दस्य उपपदसंज्ञायां कुम्भोपपदात् कृधातोः 'कर्मण्यण्' इत्यणि 'अचो ञ्णिति' इति वृद्धौ रपरत्वे 'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठ्यां गतिकारकेति परिभाषया सुबुत्पत्तेः प्रागेव 'उपपदमतिङ्' इति समासे सुबलुकि एकदेशविकृतस्यानन्यत्वात् प्रातिपदिकत्वेन सौ सस्य रुत्वे विसर्गे च कृते सति 'कुम्भकारः' इति प्रयोगः साधुतां याति।

(7) संहितैकपदे नित्या इति कारिकां प्रस्तुत ?

उत्तरम् → संहितैकपदे नित्या नित्या धातूपसर्गयोः।
नित्या समासे वाक्ये तु सा विवक्षामपेक्षते ।।

(8) उपसर्गेण धात्वर्थो॰ इति कारिकां प्रस्तुत ?

उत्तरम् → उपसर्गेण धात्वर्थो बलादन्यत्र नीयते।
प्रहाराहारसंहारविहारपरिहारवत् ।।

(9) सत्तायां विद्यते॰ इति श्लोकं प्रस्तुत ?

उत्तरम् → सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।
विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात् ।।

(10) गौणे कर्मणि दुह्यादेः॰ इति कारिकां प्रस्तुत ?

उत्तरम् → गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः ।।

(11) आत्मनाम॰ इति कारिकां प्रस्तुत ?

उत्तरम् — आत्मनाम गुरोर्नाम नामातिकृपणस्य च।
श्रेयस्कामो न गृह्णीयाज्ज्येष्ठापत्यकलत्रयोः ।। इति।

।। शम् ।।

जितेन्द्र कुमार ब्राह्मणः
मा॰शिक्षक
रा॰बा॰उ॰मा॰वि॰ तेजूखेड़ा